# Brahmastotram Pancharatnastotram

# બ્રહ્મસ્તોત્રમ્ અથવા પઞ્ચરત્નસ્તોત્રમ્

## Document Information

Text title : brahmastotraM 1 evaM pancharatnastotraM

File name : brahmastotram.itx

Category : deities_misc, stotra, pancharatna

Location : doc_deities_misc

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : mahaanirvaaNa ta.ntra, paTala 3, verses 59-64

Latest update : October 23, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 23, 2021

*sanskritdocuments.org*

# બ્રહ્મસ્તોત્રમ્ અથવા પઞ્ચરત્નસ્તોત્રમ્

સ્તોત્રં શ ૃણુ મહેશાનિ બ્રહ્મણઃ પરમાત્મનઃ ।
ઉચ્છ્રુત્વા સાધકો દેવિ બ્રહ્મસાયુજ્યમશ્નુતે ॥

ૐ નમસ્તે સતે સર્વલોકાશ્રયાય
 નમસ્તે ચિતે વિશ્વરૂપાત્મકાય ।
નમોઽદ્વૈતતત્ત્વાય મુક્તિપ્રદાય
 નમો બ્રહ્મણે વ્યાપિને નિર્ગુણાય ॥ ૧॥

ત્વમેકં શરણ્યં ત્વમેકં વરેણ્યં
 ત્વમેકં જગત્કારણં વિશ્વરૂપમ્ ।
ત્વમેકં જગત્કર્તૃપાતૃપ્રહાર્તૃ
 ત્વમેકં પરં નિશ્ચલં નિર્વિકલ્પમ્ ॥ ૨॥

ભયાનાં ભયં ભીષણં ભીષણાનાં
 ગતિઃ પ્રાણિનાં પાવનં પાવનાનામ્ ।
મહોચ્ચૈઃ પદાનાં નિયન્તૃ ત્વમેકં
 પરેશં પરં રક્ષણં રક્ષણાનામ્ ॥ ૩॥

પરેશ પ્રભો સર્વરૂપાવિનાશિન્
 અનિર્દેશ્ય સર્વેન્દ્રિયાગમ્ય સત્ય ।
અચિન્ત્યાક્ષર વ્યાપકવ્યક્તતત્ત્વ
 જગદ્ભાસકાધીશ પાયાદપાયાત્ ॥ ૪॥

તદેકં સ્મરામસ્તદેકં ભજામ-
 સ્તદેકં જગત્સાક્ષિરૂપં નમામઃ ।
સદેકં નિધાનં નિરાલમ્બમીશં
 ભવામ્ભોધિપોતં શરણ્યં વ્રજામઃ ॥ ૫॥

પઞ્ચરત્નમિદં સ્તોત્રં બ્રહ્મણઃ પરમાત્મનઃ ।

યઃ પઠેત્પ્રયતો ભૂત્વા બ્રહ્મસાયુજ્યમાપ્નુયાત્ ॥

પ્રદોષેઽદઃ પઠેન્નિત્યં સોમવારે વિશેષતઃ ।
શ્રાવયેદ્બોધયેત્પ્રાજ્ઞો બ્રહ્મનિષ્ઠાન્સ્વબાન્ધવાન્ ॥

ઇતિ તે કથિતં દેવિ પઞ્ચરત્નં મહેશિતુઃ ।

ઇતિ મહાનિર્વાણતંત્રે બ્રહ્મસ્તોત્રં એવં પઞ્ચરત્નસ્તોત્રં સમાપ્તમ્ ॥

Encoded and proofread by Sunder Hattangadi

*Brahmastotram Pancharatnastotram*

pdf was typeset on October 23, 2021

Please send corrections to *sanskrit@cheerful.com*